## आगवीनः । (१४/१८१५)

आगवीनः इति निपात्यते । [1]गोः आङ्पूर्वाद् आ तस्य गोः [2]प्रतिपादनात् कर्मकारिणि खः प्रत्ययो निपात्यते (म. भा. २.३७४) । आगवीनः कर्मकरः । [3]यो गवा भृतः कर्म करोति[4] आ तस्य गोः प्रत्यर्पणात् ॥

## अनुग्वलङ्गामी । (१५/१८१६)

गोः पश्चाद् अनुगु । अनुगुशब्दाद् [5]अलङ्गामी [6]इत्यतस्मिन्नर्थे खः प्रत्ययो भवति । अनुगु [7]पर्याप्तं गच्छति अनुगवीनः [8]गोपालकः ॥

## अध्वनो यत्खौ । (१६/१८१७)

तत् इति द्वितीया समर्थविभक्तिरनुवर्तते । अलङ्गामी इति च प्रत्ययार्थः । अध्वन्शब्दात् द्वितीयासमर्थाद् अलङ्गामी इत्येतस्मिन्नर्थे यत्खौ प्रत्ययौ भवतः । अध्वानम[9]लङ्गामी अध्वन्यः, अध्वनीनः । 'ये चाभावकर्मणोः' (६.४.१६८/११५४), '[10]आत्माध्वानौ खे' (६.४.१६९/१६७१) इति[11] प्रकृतिभावः ॥

## अभ्यमित्राच्छ च । (१७/१८१८)

अभ्यमित्रशब्दात्[12]द्वितीयासमर्थात् अलङ्गामी इत्यस्मिन्नर्थे छः प्रत्ययो भवति । चकाराद् यत्खौ च । अभ्यमित्रम् [13]अलङ्गामी अभ्यमित्रीयः, अभ्यमित्र्यः, अभ्यमित्रीणः । अमित्राभिमुखं सुष्ठु गच्छति इत्यर्थः ॥

## गोष्ठात् खञ् [14]भूतपूर्वे । (१८/१८१९)

गावस्तिष्ठन्त्यस्मिन् इति [15]गोष्ठम् । गोष्ठशब्देन सन्निहितगोसमूहो देश उच्यते । भूतपूर्वग्रहणं तस्यैव विशेषणम् । गोष्ठशब्दाद् भूतपूर्वोपाधिकात् स्वार्थे [16]खञ् प्रत्ययो भवति । गोष्ठो भूतपूर्वः[17] गौष्ठीनो देशः[18] । भूतपूर्वग्रहणं किम् ? गोष्ठो वर्तते ॥

## अश्वस्यैकाहगमः । (१९/१८२०)

निर्देशादेव समर्थविभक्तिः । अश्वशब्दाद् षष्ठीसमर्थात् एकाहगमः इत्येतस्मिन्नर्थे खञ् प्रत्ययो भवति । एकाहेन गम्यते इति एकाहगमः । अश्वस्य एकाहगमोऽध्वा आश्वीनः[19] । 'आश्वीनानि शतं पतित्वा' (तां. ब्रा. २१.१.९) ॥

---

1. गोराङ्पूर्वायाः क, गोराङ्पूर्वात् आगतस्य ड. 2. प्रतिदानात् कारिणि ह. 3. यो नास्ति फ. 4. इत्यर्थः इत्यधिकम् फ. 5. द्वितीयासमर्थात् इत्यधिकम् क. 6. इत्येतस्मिन्नर्थे फ. ह. 7. गोः पश्चात् अत्यन्तं गच्छति ग. ह. 8. गोपालः ग. 9. अलं गच्छति क. ड. फ. 10. इति इत्यधिकम् क. 11. च इत्यधिकम् ड. 12. तत् इति इत्यधिकम् क. फ. 13. अलं गच्छति ब.क.फ.ह. 14. भूतपूर्वात् क. 15. गोष्ठो देशः ड. 16. खः मुद्रितः पाठः. 17. देशः इत्यधिकम् क, गोष्ठीनः मुद्रितः पाठः. 18. लिङ्गविशिष्टगत्या गोष्ठीशब्दस्यापि ग्रहणम् इत्यधिकम् ग. 19. अध्वा इत्यधिकम् ब. क.